रोल नं०

# Subject Code No. : 205

**CLASS : 12th** **Q. P. Code : 1**

# संस्कृत

***ACADEMIC/OPEN***

**SEMESTER – I (Objective Type)**

***Evening Session***

(Only for Re-appear Candidates)

*समय : $1\frac{1}{2}$ घण्टे]* *[ पूर्णांक : 90*

---

- *इस प्रश्न-पत्र में **90** बहुवैकल्पिक प्रश्न दिये गये हैं। प्रत्येक प्रश्न का **एक** अंक है। **सभी प्रश्न अनिवार्य हैं।***
- *उत्तर पत्रक (ओ० एम० आर०) पर विवरण लिखने / उत्तर देने के लिए केवल **काले / नीले** बॉल पॉइन्ट पेन का प्रयोग करें।*
- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **16** तथा प्रश्न **90** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **सबजेक्ट कोड नम्बर** एवं **क्वेस्चन पेपर कोड** को छात्र ओ० एम० आर० पर लिखें।*
- *अपठित उत्तर या ऐसे उत्तर जिन्हें काटा या बदला गया है, निरस्त कर दिये जाएँगे।*
- *दिये गये **4** विकल्पों (A), (B), (C) और (D) में से परीक्षार्थी को प्रत्येक प्रश्न के उत्तर के लिए **सर्वाधिक उपयुक्त केवल एक ही विकल्प** चुनना है।*
- *परीक्षार्थी उत्तर पत्रक (ओ० एम० आर०) पर अपना अनुक्रमांक अंकों के साथ-साथ गोले में भी भरें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

## 'क' खण्डः

## (अपठित अवबोधनम् )

*गद्यांशः* – विद्यायाः विचित्रो महिमा वर्तते। विद्याधनं सर्वधनप्रधानम् अस्ति। अन्यानि सर्वाणि धनानि तु व्ययकृतानि क्षीणानि जायन्ते। विद्याधनं तु व्यय कृते अपि वर्तते। कथम् एतत् ? वयम् अनुभवामः यत् यदा वयम् अन्येभ्यः विद्यां वितरामः तदा विद्यायाः वृद्धिः भवति। यदि वयं विद्याम् अन्येभ्यः न वितरामः तदा शनैः शनैः स्वतः विद्या क्षीणा भवति। विद्या विनयं ददाति। जनः विनयात् पात्रतां प्राप्नोति। सः पात्रत्वात् धनम् आप्नोति। धनात् धर्मम् आप्नोति। धर्मात् च सुखम् आप्नोति। अनेन विद्वांसः अन्ततोगत्वा अपूर्वं सुखं लभन्ते। विद्यावान् नरः सर्वत्र पूजार्हः भवति। सः स्वदेशे अपि सम्मानं लभते, परदेशे अपि आदरम् अवाप्नोति।

**1.** विद्यायाः महिमा कीदृशी वर्तते

(A) अस्पष्टा (B) विचित्रो (C) अज्ञाता (D) अस्थिरा

**2.** यदा वयम् अन्येभ्यः विद्यां वितरामः तदा विद्यायाः किम् भवति

(A) हानिः (B) व्ययः (C) वृद्धिः (D) क्षयः

**3.** जनः विनयात् किम् प्राप्नोति

(A) पात्रताम् (B) कष्टं (C) हानिं (D) दुःखं

**4.** विद्यया विद्वांसः अपूर्वं किम् लभन्ते

(A) दुःखम् (B) सुखं (C) कष्टम् (D) हानिं

**5.** विद्यावान् नरः सर्वत्र ---------- भवति

(A) पूजार्हः (B) निन्दनीयः (C) परिहरणीय (D) अनादरणीयः

6. अस्य गद्यांशस्य समुचितं शीर्षकं किम् अस्ति

(A) विद्वान् (B) विनयं

(C) विद्यायाः महिमा (D) धनस्य महिमा

7. 'विद्यावान् नरः' अत्र किम् विशेषणपदम् अस्ति

(A) विद्या (B) विद्यावान् (C) न किमपि (D) नरः

8. 'सर्वाणि धनानि' अत्र सर्वनामपदं किम् अस्ति

(A) सर्व (B) धनानि (C) सर्वाणि (D) धन

9. 'ददाति' इति पदे को लकारः अस्ति

(A) लट् (B) लङ् (C) विधिलिङ् (D) लोट्

10. 'सञ्चये' इत्यस्य किं विलोमपदं प्रयुक्तम्

(A) विनय (B) व्यये (C) अपूर्वं (D) कृते

## 'ख' खण्डः

## (रचनात्मकम् कार्यम्)

*कथा* – कस्मिंश्चिदधिष्ठाने (11) ---------- ब्राह्मणपुत्राः स्म। तेषां त्रयः शास्त्रपारंगता परं (12) ---------- आसन् । एकस्तु (13) ---------- केवलं शास्त्ररहितः आसीत् । एकदा तैः (14) --------- कतिचित् अस्थीनि दृष्टानि। तदा एकः कथयति – 'अहं (15) ---------- प्रभावेण अस्थिसंचयं करोमि।'

(16) ---------- तस्मिन् चर्ममांसरुधिरं संयोजयति। तृतीयः यावत् तं जीवितं कर्तुमिच्छति (17) ---------- सुबुद्धिना निषिद्धः – 'भो ! तिष्ठतु भवान् (18) ---------- सिंहः क्रियते। यदि एनं संजीव करिष्यति तत् सर्वानापि (19) ----------।' अतः कथ्यते – विद्यायाः (20) ---------- उत्तमा।

**11.** (A) चत्वारि (B) चत्वारः (C) चतस्रः (D) चतुः

**12.** (A) बुद्धिरहिताः (B) धनरहिताः (C) शक्तिहीनाः (D) निर्बलाः

**13.** (A) धनवान् (B) बुद्धिमान् (C) गुणवान् (D) श्रद्धावान्

**14.** (A) गृहे (B) वने (C) विद्यालये (D) क्रीडाक्षेत्रे

**15.** (A) बलस्य (B) शक्तेः (C) विद्यायाः (D) धनस्य

**16.** (A) द्वि (B) द्वे (C) द्वयः (D) द्वितीयः

**17.** (A) तावत् (B) तत्र (C) यत्र (D) तत्

**18.** (A) एतत् (B) एषः (C) एषा (D) एते

**19.** (A) भक्षयिष्यति (B) भक्षिष्यति (C) भक्षति (D) भक्षियति

**20.** (A) बुद्धिः (B) बल (C) धन (D) यश

## 'ग' खण्डः

## (अनुप्रयुक्तम् व्याकरणम् )

*सन्धिः/सन्धिविच्छेदः* –

**21.** स्वाद्वत्ति

(A) स्वादु + अत्ति (B) स्वाद + वत्ति

(C) स्वाद् + अत्ति (D) स्वादु + ति

**22.** समुद्रे + अस्तम्

(A) समुद्रेस्तम् (B) समुद्रेऽस्तम्

(C) समुद्रैस्तम् (D) समुद्रास्तम्

**23.** ह्याप्तकामा

(A) हि + आप्तकामाः (B) ह्य + आप्तकामाः

(C) हयः + आप्तकामाः (D) हि + अप्तिकामाः

**24.** विद्यया + अमृतम्

(A) विद्ययाऽमृतम् (B) विद्ययामृतम्

(C) विद्यामृतम् (D) विद्ययाअमृतम्

**25.** स्नान + उतीर्णः

(A) स्नानोत्तीर्णः (B) स्नानुतीर्णः

(C) स्नानउतीर्णः (D) स्नानोऽतीर्णः

*समासः/विग्रहः* –

**26.** शरीरयात्रा

(A) शरीरः यात्रा (B) शरीरो यात्रा

(C) शरीरस्य यात्रा (D) शरीरेण यात्रा

**27.** लोकस्य संग्रहः

(A) लोकसंग्रहम् (B) लोकेसंग्रहम्

(C) लोकसंग्रहस्य (D) लोकेऽसंग्रहम्

**28.** असक्तः

(A) न सक्तः (B) न असक्तः

(C) अन् सक्तः (D) आ सक्तः

**29.** कर्मसंगिनाम्

(A) कर्मे संगगिनाम् (B) कर्मेण संगिनाम्

(C) कर्मसु संगिनाम् (D) कर्मैः संगिनाम्

**30.** मम वचनात्

(A) मदः वचनात् (B) मतः वचनात्

(C) मद्वचनात् (D) ममवचनात्

*प्रकृति-प्रत्ययः –*

**31.** दग्धः

(A) दह् + क्त (B) दा + क्त

(C) दह् + क्तवत् (D) दह् + क्त्वा

**32.** अवलिप्तः

(A) अव् + लिप् + क्त्वा (B) अव + लिप् + क्त

(C) अव् + लिप + क्त्वत् (D) अव + लिप्त + क्त

**33.** ध्यायमानः

(A) ध्याय + मतुप् (B) ध्याय + मान

(C) ध्यै + शानच् (D) ध्यै + मतुप्

**34.** प्रतिगन्तुम्

(A) प्रति + गम् + तुमुन् (B) प्रति + गन्तुम्

(C) प्रति + गम् + क्त (D) प्रति + गम् + क्त्वा

**35.** दृश्या

(A) दृश् + क्त्वा (B) दृश् + यत्

(C) दृश + तुमुन् (D) दृश् + क्त

*पर्यायः –*

**36.** अहोरात्रम्

(A) अहो रात्रि (B) अहः रात्रौ (C) अहर्निशम् (D) अहौ रात्रि

**37.** चञ्चला

(A) चपला (B) चचला (C) चञ्चले (D) अचला

**38.** निरादरः

(A) आदर (B) पराभवः (C) निरापदः (D) नीवारः

**39.** समीपे गच्छति

(A) उपो गच्छति (B) आगच्छति (C) अप गच्छति (D) उपसर्पति

**40.** इदानीम्

(A) ह्यः (B) अधुना (C) इदम् (D) श्वः

## 'घ' खण्डः

## (पठित-अवबोधनम्)

*पद्यांशः* **–** कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि।।

**41.** अयम् श्लोकः कस्मात् पाठात् उद्धृतो अस्ति

(A) गीतोपदेशाः (B) कर्मयोगः

(C) गीतगोविन्दं (D) गीतातत्त्वम्

**42.** अस्य श्लोकस्य पाठः कस्मात् उद्धृतो अस्ति

(A) श्रीमद्भगवद्गीतायाः (B) गीतारहस्यात्

(C) महाकाव्यात् (D) गीतांजलिपुस्तकात्

**43.** अस्य श्लोकस्य पाठस्य ग्रन्थः कस्मात् उद्धृतः अस्ति

(A) रामायणात् (B) दुर्गासप्तशतीग्रन्थात्

(C) योगवसिष्ठात् (D) महाभारतात्

**44.** जनकादयः केन एव संसिद्धिम् अस्थिताः

(A) कर्मणा (B) कर्म (C) सुकर्म (D) दुष्कर्म

**45.** अर्जुनः किम् संपश्यन् अपि कर्तुम् एव अर्हति

(A) लोक (B) लोकसंग्रहम् (C) संग्रहं (D) एवापि

**46.** कर्मणा एव हि संसिद्धिमास्थिता ---------- आदयः

(A) राम (B) अर्जुन (C) जनक (D) कृष्ण

**47.** 'अर्हसि' इति पदे को लकारः

(A) लट् (B) लङ् (C) लोट् (D) विधिलिङ्

**48.** 'लोकसंग्रहम्' इति पदस्य अर्थः अस्ति

(A) लोककल्याणम् (B) एकत्रितम् (C) लोक (D) संग्रहम्

**49.** 'कर्मणा एव हि संसिद्धिमास्थिता जनकादयः' इति श्लोकांशस्य अन्वयः अस्ति

(A) जनक आदयः कर्मणा एव संसिद्धिम् आस्थिताः

(B) कर्मणा एव संसिद्धिम् जनक आदयः आस्थिताः

(C) संसिद्धिम् जनक आदयः आस्थिता कर्मणा एव

(D) आस्थिताः जनक आदयः कर्मणा एव संसिद्धिम्

**50.** 'लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि' इति श्लोकांशस्य अन्वयः अस्ति

(A) हि लोक-संग्रहम् संपश्यन अपि कर्तुम् एव अर्हसि।

(B) हि संपश्यन संग्रहम् लोक अपि कर्तुम् एव अर्हसि

(C) लोकसंग्रह हि कर्तुम् एव अर्हसि संपश्यन्

(D) अपि कर्तुम् एव अर्हसि हि लोकसंग्रहम् संपश्यन्

*गद्यांशः* – न क्वचिदपि निर्भरमाबघ्नाति पदम्। मधुपानमत्तेव परिस्खलति। सरस्वतीपरिगृहीतम् ईर्ष्ययेव नालि>ति। जनं गुणवन्तमपवित्रमिव न स्पृशति। उदारसत्त्वम>लमिव न बहु मन्यते। शूरं कण्टकमिव परिहरति। दातारं दुःस्वप्नमिव न स्मरति। विनीतं पातकिनमिव नोपसर्पति। मनस्विनमुन्मत्तमिव उपहसति।

**51.** अयम् गद्यांशः कस्मात् पाठात् उद्धृतः अस्ति

(A) लक्ष्म्याः प्रभावः

(B) लक्ष्मी कवच

(C) लक्ष्मी स्त्रोतम्

(D) लक्ष्मीस्तुतिः

**52.** अस्य गद्यांशस्य पाठः कस्मात् ग्रन्थात् संकलितो अस्ति

(A) मेघदूतं

(B) मालविकाग्निमित्रम्

(C) हर्षचरितं

(D) कादम्बरी

**53.** अस्य गद्यांशस्य पाठस्य ग्रन्थस्य लेखकः कः अस्ति

(A) कालिदासः (B) भासः (C) बाणभट्टः (D) दण्डी

**54.** लक्ष्मी कम् जनम् अपवित्रमिव न स्पृशति

(A) गुणीं (B) जनम् (C) गुणवन्तम् (D) सुन्दरम्

**55.** लक्ष्मी कम् कण्टकमिव परिहरति

(A) गुणवान् (B) शूरं (C) गुणवन्तम् (D) निर्बलं

**56.** लक्ष्मी सरस्वतीपरिगृहीताम् ---------- इव नालिङ्गति

(A) ईर्ष्या (B) अपवित्रम् (C) निर्धनम् (D) उदारं

**57.** लक्ष्मी दातारं ---------- इव न स्मरति

(A) स्वप्नम् (B) दुःस्वप्नम् (C) शुभ स्वप्नम् (D) पापिनम्

**58.** 'उपहसति' इति पदे कः लकारः

(A) लोट् (B) लङ् (C) लट् (D) विधिलिङ्

**59.** 'दातारम्' इति पदे का विभक्तिः

(A) द्वितीया (B) तृतीया (C) षष्ठी (D) चतुर्थी

**60.** 'विनम्रं' इति अर्थाय गद्यांशे कम् पदं प्रयुक्तं

(A) पातकिनम् (B) विनीतं (C) दातारम् (D) मनस्विनम्

## 'ङ' खण्डः

## (संस्कृत-साहित्य-परिचयः)

**61.** 'उपनिषदामृतम्' पाठः केभ्यः ग्रन्थेभ्यः आधारितं अस्ति

(A) धर्मशास्त्रेभ्यः (B) वैदिकग्रन्थेभ्यः

(C) उपनिषदेभ्यः (D) लौकिकग्रन्थेभ्यः

**62.** 'तैत्तिरीयोपनिषद' केन वेदेन सम्बद्धः अस्ति

(A) शुक्लयजुर्वेदेन (B) ऋग्वेदेन

(C) अथर्ववेदेन (D) सामवेदेन

**63.** श्रीमद्भगवद्गीतायाम् श्रीकृष्णाः अर्जुनाय कस्य कर्मयोगस्य शिक्षां ददाति

(A) सकामकर्मस्य (B) कामप्रधानस्य

(C) निष्कामकर्मस्य (D) योगप्रधानस्य

**64.** महाभारतस्य लेखकः कः अस्ति

(A) श्रीकृष्णः (B) संजयः (C) वेदव्यासः (D) वाल्मीकिः

**65.** अभिज्ञानशाकुन्तले कति अङ्काः सन्ति

(A) चत्वारः (B) त्रयः (C) सप्त (D) पञ्च

**66.** 'बाणोच्छिष्टं ---------- सर्वम्'

(A) जगत् (B) गद्यं (C) पद्यं (D) काव्यं

**67.** का बाणस्य रचना न अस्ति

(A) कादम्बरी (B) हर्षचरितम्

(C) दशकुमारचरितम् (D) न किमपि

**68.** वैराग्यशतकम् ---------- रचना अस्ति

(A) श्रीहर्षस्य (B) भर्तृहरेः (C) सुबन्धोः (D) दण्डिनः

**69.** 'शुकनासोपदेशात्' उद्धृतः पाठः ---------- अस्ति

(A) लक्ष्म्याः प्रभावः (B) नीतिश्लोकाः

(C) लक्ष्मीस्तुतिः (D) कर्मयोगः

**70.** 'नीतिशतकं' एकं ---------- अस्ति

(A) महाकाव्यम् (B) नाटकम् (C) गीतिकाव्यम् (D) दूतकाव्यम्

## 'च' खण्डः

## (छन्दोऽलंकार–परिचयः)

*छन्दः* –

**71.** एकस्मिन् श्लोके कति चरणाः भवन्ति

(A) द्वौ (B) त्रयः (C) चत्वारः (D) चत्वारि

**72.** यस्मिन् वृत्ते चत्वारः एव चरणाः समाक्षराः न भवन्ति तत् किम् कथ्यते

(A) समवृत्त (B) विषमवृत्त (C) अर्धसमवृत्त (D) अर्धविषमवृत्त

**73.** यस्मिन् छन्दे प्रतिचरणे अष्टवर्णाः भवन्ति तं कथयन्ति

(A) इन्द्रवज्रा (B) अनुष्टुप् (C) उपेन्द्रवज्रा (D) त्रिष्टुप्

**74.** छन्देषु । इति चिह्नं ---------- भवति

(A) लघु (B) गुरु (C) अर्ध (D) विषम

**75.** लौकिकछन्दः न अस्ति

(A) त्रिष्टुप् (B) इन्द्रवज्रा (C) अनुष्टुप् (D) उपेन्द्रवज्रा

**76.** उपेन्द्रवज्रा जतजाः ---------- गौ

(A) सततगा (B) सतत् (C) ततो (D) गाः

**77.** 'पावका न सरस्वती' इति मन्त्रे छन्दः अस्ति

(A) गायत्री (B) इन्द्रवज्रा (C) त्रिष्टुप् (D) उपेन्द्रवज्रा

**78.** छन्देषु ऽ।। इति चिह्नं ---------- भवति

(A) भ गणे (B) म गणे (C) न गणे (D) य गणे

**79.** छन्देषु दीर्घस्वराः भवन्ति

(A) गुरु (B) लघु (C) शब्द (D) व्यञ्जन

**80.** *श्लोके षष्ठं गुरुज्ञेयं सर्वत्र लघुपञ्चमम्।*

*द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः।।*

इति ---------- छन्दस्य लक्षणम् अस्ति

(A) अनुष्टुप् (B) त्रिष्टुप् (C) गायत्री (D) इन्द्रवज्रा

*अलंकारः* –

**81.** काव्ये शब्दानां शोभा भवति

(A) शब्दालंकारेण (B) अर्थालंकारेण

(C) उभयालंकारेण (D) न किमपि

**82.** श्लिष्टैः ---------- अनेकार्थाभिधाने श्लेष इष्यते

(A) शब्दैः (B) अर्थैः (C) पदैः (D) स्वरैः

**83.** *'ललितलवंगलतापरिशीलन कोमलमलयसमीरे'* इति श्लोके अस्ति

(A) अर्थालंकार (B) शब्दालंकार (C) न कोऽपि (D) उभयालंकार

**84.** अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् इति लक्षणम् अस्ति

(A) अनुप्रासस्य (B) श्लेषस्य (C) यमकस्य (D) न कस्यापि

**85.** ये शब्दार्थयोरस्थिराः धर्माः ते ---------- सन्ति

(A) अलंकाराः (B) शब्दाः (C) अर्थाः (D) गुणाः

**86.** अधोलिखितपंक्तिषु कस्यां यमक अलंकारः अस्ति

(A) वहन्ति वर्षन्ति नदन्ति भान्ति (B) नवपलाशपलाशवनं पुरः

(C) प्रतिकूलतामुपगते हि विधौ (D) न कस्यां अपि

**87.** अलंकारस्य कति भेदाः सन्ति

(A) त्रयः (B) चत्वारः (C) द्वि (D) एकः

**88.** ---------- उभयालंकारः अस्ति

(A) श्लेषः (B) उपमा (C) अनुप्रासः (D) यमक

**89.** ---------- शब्दालंकारः अस्ति

(A) यमकः (B) रूपकः (C) उपमा (D) उत्प्रेक्षा

**90.** कः अर्थालंकारः अस्ति

(A) श्लेष (B) यमकः (C) अनुप्रासः (D) उत्प्रेक्षा

**p**